## अध्याय :- १९ chapter-19

नारद उवाच ।।[१]

[२]कालनेमी रुपाविष्टस्तेभ्यां[२] स्वरूपं न[३] बुद्धवान् ।
ततोनिमिं च दैत्येन्द्रं मत्वा देवं महाजवः ।। १

केशेषु गृह्य तं वीरं चकर्षाच ननाद च ।
ततो निमिरुवाचेदं कालनेमिं महाबलम् ।। २

अहं निमिः कालनेमे सुतं मत्वा वधस्व मा[४] ।।
भवता मोहितेनाजौ देवान्मत्वासुराः स्वकाः ।। ३

सुरैः सुदुर्जयाः कोध्यो निहतादशविध्यतत् ।।
सर्वास्त्रवारणं मुंच ब्राह्ममस्त्रं त्वरान्वितः ।। ४

स तेन बोधितो दैत्यो मुक्त्वा तं संभ्रमाकुलः ।।
ब्राणं ब्रह्मास्त्रविहितं भुमोचत्वरयान्वितः ।। ५

ब्रह्मास्त्रं तत्प्रजज्वाल ततः खे सुमहाद्भुतम् ।।
देवानां चाभवत्सैन्यं सर्वमेव भयाकुलम् ।। ६

शंबरास्त्रं ततः शान्तं[५] ब्राह्मप्रतिहतं तदा ।।
तस्मिन्प्रतिहते ह्यस्त्रे संकुध्धो भास्करश्च प्रभुः ।। ७

---

१ ब. श्री नारद उ०

२ अ. "एवंसृष्टः" अत आरंभ्येते ।

३ ब नु

४ अ. मां

५ ब. ज्ञातं

महेन्द्रजालमास्थाय[1] चक्रे स्वां भीषणां तनुम् ।
विस्फूर्जत्कर संघातसमाक्रांतजग त्त्रयः ।। ८

ततापं दानवानीकं गलन्मज्जाड्रिधुशोणितम् ।
चक्षुंषि दानवेन्द्राणां चकारांधानि स प्रभूः ।। ९

गजानामगलन्मेदः चु पेतुश्चापि रथा भुवि ।
तुरंगमाः श्वसंतश्च धर्मार्ता रथिनोपि च ।। १०

इतश्चेतश्च सलिलं प्रार्थयंतस्तृषातुराः ।।
गिरिद्रोणीश्च[2] पायांश्च गिरीणां गहनानि च ।। ११

तेषां प्रार्थयतां शीघ्रमन्योन्यं च विसर्पिणाम् ।
दावाग्नि रज्वलातीव्रो घोरो[3] निर्दग्धपादपः[4] ।। १२

तोयार्थिनः पुरो दृष्ट्वा तोयं कल्लोलमालितम्[5]।
पुरः स्थितमपि प्राप्तुं न शेकुरुपसादितुम् ।। १३

अप्राप्य सलिलं भूमावभ्याशे द्रुतमेव ते ।
तत्र तत्र व्यदृश्यन्त मृता दैत्येश्वराभुवि[6] ।। १४

---

१ अ. माश्रित्य
२ अ. ब. गिरिन् द्राणिश्च
३ ब. ~~सर्पैर्नि~~ घोरार्चि
४ अ. ब. पावकः
५ अ. ब. मालिनं
६ अ. युधि

रथा गजाश्च प्रतितास्तुरंगाश्च श्रमान्विताः ।
स्थिता वमंतो धावंतो गलद्रुतसास्त्रजः ।। १५

दानवानां कोटि कोटि व्यदृश्यतमृतं तदा ।
एवं क्षयो[१] दानवानां तस्मिन्महति वर्तिते ।। १६

प्रकोपोद्भूतताम्राक्षाः कालनेमी रुषातुरः ।
बभूव कालमेघाभः स्फुरद्रोमशतह्रदः ।। १७

गंभीरास्फोट निह्रादजगद्धृदयकंपनः ।
प्रच्छाद्य गगनं सूर्यप्रभां सर्वां व्यनाशयत् ।। १८

ववर्ष शीतं च जलं दानवेन्द्रबलं प्रति ।
दैत्यास्तां वृष्टिमासाद्य समाश्वस्तास्ततः क्रमात् ।। १९

बीजांकुरा इव म्लानाः प्राप्य वृष्टिं धरातले ।
ततः स मेघरूपेण[२] कालनेमिर्महासुरः ।। २०

शस्त्रवृष्टिं ववर्षोग्रां देवानीकेषु दुर्जयः[३] ।
तया वृष्ट्या पीडयमाना दैत्यैरन्यैश्च देवताः ।। २१

---

१ अ. ब. क्षये
२ अ. रूपीतु
३ अ. दुर्जयां

गतिं कांचिन्न पश्यन्ति गावः शीतार्दिता इव ।।
परस्परं व्यलीयंत[1] गजेषु तुरंगेषु च ।।
रथेषु च भयत्रस्तास्तत्र तत्र निलिलियरे ।। २२

एवं ते लीयमानाश्च निहताः कालनेमिना ।।
दृश्यंते पतिता देवाः शस्त्रभिन्नांग संचयः ।। २३

विभिन्ना भिन्नमूर्धानस्तथा भिन्नोरुजानवः ।।
विपर्यस्तं स्थांगैश्च पतितं ध्वजशक्तिभिः ।। २४

तुरंगाणां सहस्त्राणि [2]गजानामयुतानी च ।।
रक्तेन तेषां घोरेण दुस्तरा चाभवन्मही ।। २५

एवमाजौ महादैत्यः कालनेमिर्महासुरः ।।
जघ्ने मुहूर्त मात्रेण गंधर्वाणां दशायुतम् ।। २६

यक्षाणां[3] ~~पंचलक्ष~~ पंचलक्षाणि किनराणां तथैव च ।।
जघ्ने [4]पिशाचमुख्यानां सप्तलक्षाणि निर्भयः ।। २७

इतरेषां न संख्यास्ति सुरजाति निकायिनाम् ।।
जघ्ने स कोटिशः क्रुद्धः कालनेमिर्मदोत्कटः ।। २८

---

१ अ. विलीयंतौ

२ ब. जगनामयुतानी

३ अ. यक्षाणि

४ अ. पिनाक....

एवं प्रतिभये भीमे तदामरमहाक्षये ।।
संक्रुद्धावश्विनौ वीरौ चित्रास्त्रकवचोज्ज्वलौ ।। २९

जघ्नतुस्तौ रणे दैत्यमेकैकं षाष्टिभिः शरैः ।।
निर्भिद्य ते महादैत्यं संपुंरवा विविशुर्महीम् ।। ३०

ताभ्यां[१] बाणप्रहारैस्तु किंचित्सो(वाप्त चेतनः ।।
जग्राह चक्रं लक्षारं तैलधौतं रणो(धिकम् ।। ३१

तेन चक्रेण सोश्विभ्यांचिच्छेद रथ कूबेरम् ।।
जग्राहाथ धनुर्दैत्यः [२]शरांश्चैवा शीविषोपमान् ।। ३२

ववर्ष भिषाजोर्मूर्घ्नि संछाद्याकाश गोचरम् ।।
तावप्यस्त्रैः स्मृतैः सर्वाश्छिद तु दैत्य सायकान् ।। ३३

तच्च[३] कर्म तयोर्दृष्ट्वा विस्मतः कोपमाविशत् ।।
जग्राह मुद्गरं भीमं[४] कालदंड विभीषणम् ।। ३४

स तमुदाभ्रम्य वेगेन चिक्षेपास्य रथं प्रति ।।
तै तु मुद्गरमायां तमालोक्यां(बरगोचरे ।। ३५

---

१ ब, ताभ्या
२ शरांश्चैवा.....मान् । इदमर्ध अ. पुस्तके लुप्तम् ।
३ ब. तस्य
४ "घोरं" अ पाठः ।

मुक्त्वा रथावुभौ वेगादाप्लुतौ तरसाश्विनौ ।।
तौ रथौ स तु निष्पिष्यमुद्‌गरौ ्चलसंनिभः ।। ३६

दारयामास धरणीं हेमजाल परिष्कृतः ।।
तस्य कर्माथ तद्दृष्ट्वा भिषजौ चित्रयोधिनौ ।। ३७

वज्रास्त्रं च प्रकुर्वाणौ दानवेंद्रमयुध्यताम् ।।
घोरवज्र प्रहारैस्तु दानवः स परिक्षतः[1] ।। ३८

रथो ध्वजो धनुश्चैव छत्रं च कवचं तथा ।।
क्षणेन शतधा भूतं सर्वसैन्यस्य पश्यतः ।। ३९

तद्दृष्ट्वा दुकरं कर्म सो्श्विभ्यां भीमविक्रमः ।।
नारायणास्त्रं[2] बलवान्मुमोच रणमूर्धनि ।। ४०

ततः शशाम वज्रास्त्रं कालनेमिस्ततो रुषा ।।
जीवग्राहं[3] ग्राहयितुमश्विनौ तौ प्रचक्रमे ।। ४१

तावभिप्रायमालक्ष्य संत्यज्य समरांगणम् ।।
पदाती तैपमानांगौ प्रद्रुतौ वासवौयतः ।। ४२

---

१ अ. परिस्कृतः
२ ब अ. नारायस्त्रं
३ अ. ब. जीवग्राहे

तयोरनुगतो दैत्यः कालनेमिर्निनदन्मुहुः ।।
प्राप्यैंद्रस्य बलं क्रूरो दैत्यानीकपदानुगः ।। ४३

स काल इव कल्पांते यदा वासवमाद्रुतः ।।
तं दृष्ट्वा सर्वभूतानि [1] विविशुर्विह्वलानि तु ।। ४४

हाहारावं प्रकुर्वाणास्तदा देवाश्च मेनिरे ।।
पराजयं महेंद्रस्य सर्वलोकक्षयावहम् ।। ४५

चेलुः शिखरिणो मुख्याः पेतुरुल्का नभस्तलात् ।।
जगर्जुर्जलदा दिक्षु संभूतश्च महारवः ।। ४६

तां भूतविकृतिं दृष्ट्वा देवाः सेंद्रा[2]भयावहाः ।।
मनसा शरणं जग्मुर्वासुदेवं जगत्पतिम् ।। ४७

नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च ।।
* जगद्धिताय कृष्णाय गोविंदाय नमोनमः ।। ४८

स नो रक्षतु गोविंदो[3] भयार्तास्ति जगुः सुराः ।।
सुराणां चिंतितं ज्ञात्वा भगवान्गरुडध्वजः ।। ४९

---

१ अ. विवेष्टु

२ अ. सेन्द्राः

३ ब. गोविंदा

* जग.....नमः । अ. पत्री इत्ययं पाठः नास्ति ।

विबुध्येय च पर्यंकाद्योगनिंद्रा विहाय सः ।।
लक्ष्मीकरयुगां भोजलालितांधि सरोरुहः ।। ५०

शारदांबर[१] नीराब्जकांति देहच्छविः प्रभु:।।
कौस्तु भोद्‌भासित्ददयः कांत केयुर भास्करः ।। ५१

विमृश्य[२] सुरसंक्षाभं वैनतेयमथाह्वयत् ।।
आहूते[३] वस्थि तेतस्मिन्गरुडे दुःखिते भृशम् ।। ५२

दिव्य नानास्त्रतीक्ष्णार्चिरारुदया गात्सुराह्वम् ।।
तत्रापश्यत देवेंन्द्रं भयभीतमभिद्रुतम् ।। ५३

दानवेंद्रैर्नवां भोदसच्छायैः सर्वथोत्कटैः ।।
यथा हि पुरुषां घोरैर भागृथैरर्थकांक्षिभिः ।। ५४

तत्राणायाव्रजद्विष्णुः स्तूयमानो मुहः सुरैः ।।
अभागृयेभ्यः परित्रातुं[४] सुकृतं निर्मलं यथा ।। * ५ ५५

अथापश्यत दैत्येंद्रो वियति द्युति मंडलम् ।।
स्फुरंतमुदयाच्छीघ्रं कांतं सूर्यशतं यथा ।। ५६

---

१ अ. शरदां

२ अ. प्रतौ नास्ति ।

३ ब. .... वांछिते

४ अ. ब. परित्राणां

५ * After the sloka No.55 there is written in the M.S.S. 'A' -

इति श्री स्कंद पुराणे कुमारिकाखंडे देवासर युद्धे नारायणागमनं ।।

The Sloka No.56 begins with - नारद उवाच - which is not in the P.W.

प्रभवं ज्ञातुमिच्छंती दानवास्तस्य तेजसः ।।
गरुडं तमथापश्यन्कल्पांतानलभैरवम् ।। ५७

तत्र स्थितं चतुर्बाहुं हरिं चानुपमद्युतिम् ।।
तमालोक्या सुरेंद्रास्तु हर्षसंपूर्ण मानसाः ।। ५८

अयं स देवः सर्वेषां शरणं केशवोऽरिहा ।।
अस्मिज्जते जिताः सर्वा देवता नात्र संशयः ।। ५९

एनमाश्रित्य लोकेशा यज्ञभागभुजोऽमराः ।।
इत्युक्त्वा ते समागम्य सर्व एव ततस्ततः ।। ६०

तं जघ्नुर्विविधैः शस्त्रैः परिवार्य समंततः ।।
कालनेमि प्रभृतयो दश दैत्यमहारथाः ।। ६१

षाष्टया विव्याध बाणानां कालनेमिर्जनार्दनम् ।।
निमिः शतेन बाणानां मथनोऽशीतिभिः शरैः ।। ६२

जंभकश्चैव सप्तत्या शुंभो दशभिरेव च ।।
शेषा दैत्येश्वराः सर्वे विष्णुमेकैकशः[1] शरैः ।। ६३

---

१ ब. विष्णुमेकैकरः" इति पाठः स्यात् ।

दशभिर्दशभिः शल्पैर्जघ्नुः सगरुडं रणे ।।
[1]तेषामम्ृष्यत्तत्कर्म विष्णुर्दानि वसूदनः ।। ६४

एकैकं दानवं श्च जघ्ने षड्भिः षड्भिरजिह्नगैः ।।
[2]आकर्ण कृष्टै भूयश्च कालनेमिस्त्रिभिः शरैः ।। ६५

विष्णुर्विव्याध त्ददये रोषाद्रक्त विलोचनः ।।
तस्या शोभंत ते बाण त्द्दये तप्तकाचनाः ।। ६६

मयुरवा[3] इव संदीप्ताः कौस्तुभस्य स्फुरविषाः ।।
तैर्बाणैः किंचिदायस्तो हरिर्जग्राह मुद्गरम् ।। ६७

स तमुद्वाहृय वेगेन च दानवाय मुमोच वै ।।
दानवेन्द्रस्तमप्राप्तं वियत्येव शतैः[4] शरैः ।। ६८

चिच्छेद तिलशः क्रुद्धो दर्शयन्पाणिलाघवम् ।।
ततो विष्णुः प्रकुपितः प्रासं च जग्राह भैरवम् ।। ६९

तेन दैत्यस्य त्ददयं ताडयामास वेगतः[5] ।।
क्षणेन लब्ध संज्ञस्तु कालनेमिर्महासुरः ।। ७०

---

१ "तेषा.....कर्म - इदमर्ध अ. फ पुस्तके लुप्तम् ।
२ "आकर्ण.....श्च" अ. प्रतौ श्लोकार्धं नास्ति ।
३ अ. मयुषा
४ अ. शितैः
५ ब. वैगतः

शक्तिं जग्राह तीक्ष्णाग्रां हेमघंटाट्टहासिनीम् ।।
तया वामं भुजं विष्णोर्बिभेद दितिनंदनः ।। ७१

भिन्नं शक्त्या भुजं तस्य स्त्रुतशोणितमाबभौ ।।
नीलबलाहके विद्युद्द्योतंती यथा मुहुः ।। ७२

ततो विष्णुः प्रकुपितो जग्राह विपुलं धनुः ।।
सप्तदश[1] च नाराचांस्तीक्ष्णाग्रान्मर्मभेदिनः ।। ७३

दैत्यस्य हृदयं षड्भिर्विव्याध च शरैस्त्रिभिः ।।
चतुर्भिः सारथिं चास्य ध्वजं चैकेन पत्रिणा ।। ७४

द्वाभ्यां धनुर्ज्याधनुषी भुजं चैकेन पत्रिणा ।।
स विद्धो त्ददये गाढं दोष्णीमूढो यथानरः ।। ७५

स्त्रुतरक्तारुणः प्रांशुः पीडा चलित मानसः ।।
चकंपे मारुतेनेव चोदितः[2] किंशुकद्रुमः ।। ७६

ततः कंपितमालक्ष्य गदां जग्राह केशवः ।।
तां च वेगेन चिक्षेप कालनेमिवधं[3] प्रति ।। ७७

---

१ अ. सप्ता
२ अ. नोदितः ब योदितः
३ अ. रथं

सा पपात शिरस्युग्रा सहसा कालनेमिनः ।।
संचूर्णितोत्तमांगस्तु निष्पिष्टमुकुटोसुरः ।। ७८

स्नुतरक्तो धरंध्रश्च स्नुतधातुरिवाचलः ।।
पपात स्वे रथे भग्नो विसंज्ञः शिष्टजीवनः[1] ।। ७९

पतितस्य रथोपस्थे दानवस्याच्युतोऽरिहा ।।
स्मितपूर्वमुवाचेदं वाक्यं च[2] चक्रायुधः प्रभुः ।। ८०

गच्छासुर विमुक्तोऽसि सांप्रतं जीव निर्वृतः ।।
ततः स्वल्पेन कालेन अहमेव तवांतकः ।। ८१

एवं वचस्तस्य निशम्य विष्णोः सर्वेश्वरस्याथ
रथं निमेषात् ।।
निनाय दूरं किल कालनेमिनो भीतस्तदा
सारथि र्लोकनाथात् ।। ८२

*३ इति श्री स्कांदे..... देवासुरसंग्रामे कालनेमिकृत युद्ध संमर्दे विष्णुना सह कालनेमि युद्ध वर्णनं नामैकोनविंशोऽध्यायः ।।

---

१ ब. जीवितः

२ ब. चक्र

३ * अ. इति श्री स्कंद पुराणे कुमारिका खंडे कुमारेश माहात्म्ये कालनेमि पराजयः ।

ब. इति श्री स्कंद पुराणे कुमारिका खंडे नवदशोऽध्यायः ।।१९।।